॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ३३

ततः शूर्पणखा वाक्यं तच्छ्रुत्वा रोमहर्षणम् ।
सचिवानभ्यनुज्ञाय कार्यं बुद्ध्वा जगाम ह ॥ १॥

तत्कार्यमनुगम्याथ यथावदुपलभ्य च ।
दोषाणां च गुणानां च सम्प्रधार्य बलाबलम् ॥ २॥

इति कर्तव्यमित्येव कृत्वा निश्चयमात्मनः ।
स्थिरबुद्धिस्ततो रम्यां यानशालां जगाम ह ॥ ३॥

यानशालां ततो गत्वा प्रच्छन्नं राक्षसाधिपः ।
सूतं सञ्चोदयामास रथः संयुज्यताम् इति ॥ ४॥

एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः ।
रथं संयोजयामास तस्याभिमतमुत्तमम् ॥ ५॥

काञ्चनं रथमास्थाय कामगं रत्नभूषितम् ।
पिशाचवदनैर्युक्तं खरैः कनकभूषणैः ॥ ६॥

मेघप्रतिमनादेन स तेन धनदानुजः ।
राक्षसाधिपतिः श्रीमान्ययौ नदनदीपतिम् ॥ ७॥

स श्वेतबालव्यसनः श्वेतच्छत्रो दशाननः ।
स्निग्धवैदूर्यसङ्काशस्तप्तकाञ्चनभूषणः ॥ ८॥

दशास्यो विंशतिभुजो दर्शनीय परिच्छदः ।
त्रिदशारिर्मुनीन्द्रघ्नो दशशीर्ष इवाद्रिराट् ॥ ९॥

कामगं रथमास्थाय शुशुभे राक्षसाधिपः ।
विद्युन्मण्डलवान्मेघः सबलाक इवाम्बरे ॥ १०॥

सशैलं सागरानूपं वीर्यवानवलोकयन् ।
नानापुष्पफलैर्वृक्षैरनुकीर्णं सहस्रशः ॥ ११॥

शीतमङ्गलतोयाभिः पद्मिनीभिः समन्ततः ।
विशालैराश्रमपदैर्वेदिमद्भिः समावृतम् ॥ १२॥

कदल्याढकिसम्बाधं नालिकेरोपशोभितम् ।
सालैस्तालैस्तमालैश्च तरुभिश्च सुपुष्पितैः ॥ १३॥

अत्यन्तनियताहारैः शोभितं परमर्षिभिः ।
नागैः सुपर्णैर्गन्धर्वैः किंनरैश्च सहस्रशः ॥ १४॥

जितकामैश्च सिद्धैश्च चामणैश्चोपशोभितम् ।
आजैर्वैखानसैर्माषैर्वालखिल्यैर्मरीचिपैः ॥ १५॥

दिव्याभरणमाल्याभिर्दिव्यरूपाभिरावृतम् ।
क्रीडा रतिविधिज्ञाभिरप्सरोभिः सहस्रशः ॥ १६॥

सेवितं देवपत्नीभिः श्रीमतीभिः श्रिया वृतम् ।
देवदानवसङ्घैश्च चरितं त्वमृताशिभिः ॥ १७॥

हंसक्रौञ्चप्लवाकीर्णं सारसैः सम्प्रणादितम् ।
वैदूर्यप्रस्तरं रम्यं स्निग्धं सागरतेजसा ॥ १८॥

पाण्डुराणि विशालानि दिव्यमाल्ययुतानि च ।
तूर्यगीताभिजुष्टानि विमानानि समन्ततः ॥ १९॥

तपसा जितलोकानां कामगान्यभिसम्पतन् ।
गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः ॥ २०॥

निर्यासरसमूलानां चन्दनानां सहस्रशः ।
वनानि पश्यन्सौम्यानि घ्राणतृप्तिकराणि च ॥ २१॥

अगरूणां च मुख्यानां वनान्युपवनानि च ।
तङ्कोलानां च जात्यानां फलानां च सुगन्धिनाम् ॥ २२॥

पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च ।
मुक्तानां च समूहानि शुष्यमाणानि तीरतः ॥ २३॥

शङ्खानां प्रस्तरं चैव प्रवालनिचयं तथा ।
काञ्चनानि च शैलानि राजतानि च सर्वशः ॥ २४॥

प्रस्रवाणि मनोज्ञानि प्रसन्नानि ह्रदानि च ।
धनधान्योपपन्नानि स्त्रीरत्नैरावृतानि च ॥ २५॥

हस्त्यश्वरथगाढानि नगराण्यवलोकयन् ।

तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम् ॥ २६ ॥

अनूपं सिन्धुराजस्य ददर्श त्रिदिवोपमम् ।
तत्रापश्यत्स मेघाभं न्यग्रोधमृषिभिर्वृतम् ॥ २७ ॥

समन्ताद्यस्य ताः शाखाः शतयोजनमायताः ।
यस्य हस्तिनमादाय महाकायं च कच्छपम् ।
भक्षार्थं गरुडः शाखामाजगाम महाबलः ॥ २८ ॥

तस्य तां सहसा शाखां भारेण पतगोत्तमः ।
सुपर्णः पर्णबहुलां बभञ्जाथ महाबलः ॥ २९ ॥

तत्र वैखानसा माषा वालखिल्या मरीचिपाः ।
अजा बभूवुर्धूम्राश्च सङ्गताः परमर्षयः ॥ ३० ॥

तेषां दयार्थं गरुडस्तां शाखां शतयोजनाम् ।
जगामादाय वेगेन तौ चोभौ गजकच्छपौ ॥ ३१ ॥

एकपादेन धर्मात्मा भक्षयित्वा तदामिषम् ।
निषादविषयं हत्वा शाखया पतगोत्तमः ।
प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन् ॥ ३२ ॥

स तेनैव प्रहर्षेण द्विगुणीकृतविक्रमः ।
अमृतानयनार्थं वै चकार मतिमान्मतिम् ॥ ३३ ॥

अयोजालानि निर्मथ्य भित्त्वा रत्नगृहं वरम् ।
महेन्द्रभवनाद्गुप्तमाजहारामृतं ततः ॥ ३४ ॥

तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम् ।
नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥ ३५ ॥

तं तु गत्वा परं पारं समुद्रस्य नदीपतेः ।
ददर्शाश्रममेकान्ते पुण्ये रम्ये वनान्तरे ॥ ३६ ॥

तत्र कृष्णाजिनधरं जटावल्कलधारिणम् ।
ददर्श नियताहारं मारीचं नाम राक्षसं ॥ ३७ ॥

स रावणः समागम्य विधिवत्तेन रक्षसा ।
ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ३८ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com